पात्रस्या



नं. १४२५ न
श्रीविद्याया षट्कर्मविधि:
१४ पत्राणि
सं०पूर्ण

नं. ~~२~~

३६८

श्री।वि.द्या.या: षट्कर्मविधि:

नि सा
१ ॐकथयाम्यद्यदेवेशिस्तंभनानिविधिंपरम् यंविधानियमहेशाद्ये
कोयोगभाग्भवेत् स्तंभनंमोहनंचैवमारणंकर्षणंतथा वशीका
रोच्चाटनेकोशांतिकंपौष्टिकंतथा सांतानिकंमौक्तिकंचत्रयोगा।
दशकीर्तिताः स्तंभनंरविवारेतुस्नात्वाजपेद्वामनंतुशिवे यमुच्चार्य्य कृपजा
रविवारे भवेन्नृणांस्तंभनंत्वरितंकलौ नारंरमांपरांनारंकूटत्रय
मुदीरयेत् नारंपरंरमानारंफट्स्तंभनकरोत्ययं प्रकाशः ॐश्रीं
ह्रींॐकएईलह्रीं हसकलह्रीं सकलह्रीं ॐह्रींश्रींॐफट् गतेसूर्यस्य

चेद्दुग्ध्वह्निवाणादिपाथसां रिपुसैन्यादि दस्यूनां स्तंभनं जायते ध्रु
वं इति स्तंभनम् एवोऽस्मान्चाम नदीतीरे जपेन्मन्त्रं लक्षं महेश्वरी यस्यो
च्चारणमात्रेण मोहमेष्यंति भैरवाः तारं कामं शरं तारं कूटत्रयमतः
परं शरं कामं पुनस्तारं फट् मोहनमन्त्रः स्मृतः ॥ प्रकाशः ॐ क्लीं
सौः ॐ कएईलह्रीं हसकहलह्रीं सकलह्रीं सौः क्लीं ॐ फट् देवानां च न
रेशानां स्त्रीणां मन्मथरसां तथा सद्यो दर्शनमात्रेण मोहं जायते ध्रु नं
वम् इति मोहनम् एवोऽश्मशाने मंत्रस्य जपं कृत्वा महेश्वरि स्त्री

न्त्रि

२ नीयमभक्ष्यमुष्टिं च दिपे गच्छन्तु गृहे पथि सन्नाहस्त्रीयन्ते शत्रुः साधकस्य
नसंशयः तारं कालीं च कूर्चं च त्रिकूटाप ध्रुवं रन् कूर्चं कालीं तथा ता
२ रं फट् मारणमनुः स्मृतः शाकाद्यः ॐ क्रीं हूं कपई लह्रीं हसकल
ह्रीं सकलह्रीं हूं क्रीं ॐ फट् नृपो वा नृपमन्त्री वा विशेषात्क्षत्रियोपि
वा शत्रुकालसमानो पि मृत्युमेष्यति भैरवी रवो मंत्रं जपेत्प्रातः
कामी साधकसत्तमः रंभाद्यप्सरसां देवि भवेदाकर्षणं तथा तारं
मारं वाग्भवं च कूटत्रयमुदीरयेत् चेद्रं मारं तथा तारं फडाकर्षि

मन्त्रः स्पष्टः प्रकाशः ॐ क्लीं ऐं कएईलह्रीं हसकहलह्रीं सकलह्रीं ऐं क्लीं
ॐ फट् अस्योच्चारणमात्रेण सकृदाकर्षणं भवेत् रंभास्वर्गस्थि
तावापिशीघ्रं प्रादुर्भविष्यति रवौ मध्याह्नसमये स्नात्वा मूलं हू र
जपेच्छिवे जप्त्वा शीघ्रं वशं यान्ति त्रैलोक्यं सचराचरं तारं परं
स्मरं तारं कूर्चं नित्यमीश्वरि तारं स्मरः परं तारं फट् वशीकारकः
स्पष्टः प्रकाशः ॐ ह्रीं क्लीं ॐ कएईलह्रीं हसकहलह्रीं सकलह्रीं
ॐ क्लीं ह्रीं ॐ फट् ॐ अस्योच्चारणं देवास्त्रापि महेश्वरि सद्यः
मात्रेण २

२ किंकरत्वं यान्ति किं पुनः क्षुद्रभूमिपाः इति वशीकरणं एवौ गत्वा
श्मशाने तु जपेन्मंत्रं महेश्वरि यन्त्रेनेन भवेच्छत्रोरुच्चाटः स्वामरिं दम
3 नारं ह्रुजपुरः कामः कूटत्रितयमुच्चरेत् कामः शक्तिः स्तनं मारं
फडुच्चाटनके स्मृतः प्रकाशः ॐ जुं सः क्लीं कएईलह्रीं हसक
हलह्रीं सकलह्रीं क्लीं सौः जुं ॐ फट् दशवारं प्रजपेन मंत्रेण परमे
श्वरि रिपुमुच्चाटयेद्देवि सार्वभौमम पि प्रिये इत्युच्चाटनम् एवौ ज
पेन्मनुं देवि दशवारं यथाविधि । त्रिवारं सर्वरोगाणां सद्यः शान्तिर्भ

विष्यति तारंश्रारत्परांकामंकूटत्रितयमुच्चरेत् कामंश्रारक्षारंफट्
शांतिककरःस्मृतः प्रकाशः ॐसौः क्लींकएईलह्रीं हसकहल
ह्रीं सकलह्रीं क्लींह्रींसौःॐफट् रोगाणामतिदुष्टानांग्रहाणां
सुरवंदिते उपद्रवस्यसर्वस्यसद्यःशांतिर्भविष्यति इतिशांति
कम रवौस्नात्वाजपेन्मूलंदशवारंमहेश्वरि पिपासांकित
द्विग्भागेमहापुष्टिःप्रजायते तारंमारंस्मरम्लारंकूटत्रितय
मीश्वरि

४ तारंस्मरोमारतारौफट्पौष्टिककरःस्मृतः प्रकाशः ॐह्रीं
क्लींॐकएईलह्रीं हसकलह्रीं सकलह्रीं ॐक्लींक्लींॐफट् दु
एना २ र्वलानांनराणांचपित्रणांदिवौकसां सकृदुच्चारमात्रेणमा
हापुष्टिःप्रजायते इतिपौष्टिकम् एवंजपेन्मन्त्रंदेविमायको
दैवतागृहे येनजप्तेनवंध्यायाभवेत्पुत्रोन्वयेश्वरः तारंशर
पूं छरतारंकूटत्रितयमुच्चरेत् तारंशरछरतारंफट्चसा

नानिकोमन्त्रः प्रकाशः ॐसौंःसौंःॐकएईलह्रीं हसकल ।
ह्रीं सकलह्रीं ॐसौंःसौंःॐफट् वंध्यायाःकाकवंध्यायाः ॥
मृतपुत्र्याःसुरेश्वरि पुत्राभवंतिभूमीपाःस्वकुलेकप्रदीपि ।
काः इतिसंतानानिके रत्नौघानजपेन्मंत्रंनत्वद्रूपंमहेश्वरि य स्यो
त्स्मरणमात्रेणमौक्तिकंजायतेध्रुवं नारंरमारमानारंकूट
त्रयमुदीरयेत् नारंरमारमानारंफट्मौक्तिकरोत्ययम्
प्रकाशः ॐश्रींश्रींॐकएईलह्रीं हसकहलह्रीं सकल ।

५ ह्रीं ॐ श्रीं श्रीं ॐ फट् इति मौक्तिकं इदं रहस्यं हि मम सर्वस्वं रह।
स्यं त्रिदिवौकसां गोप्यं गुह्यतमं देवि न प्रकाश्यं कदाचन ॥
5 अस्य श्री महाषोडशी त्रिपुरामंत्रस्य दक्षिणामूर्तिऋषिः पंक्तिश्छंदः
श्रीत्रिपुरादेवता श्रीं बीजं ह्रीं शक्तिः क्लीं कीलकं मम श्री
धर्मार्थमोक्षार्थे जपे विनियोगः इति कृतांजलिः स्थित्वा न्यसे
यथा श्री दक्षिणामूर्तये नमः शिरसि पंक्तिछंदसे नमो मु
खे श्रीत्रिपुरादेवतायै नमः हृदि श्रीं बीजाय नमः गुह्ये

ह्रीं शक्तये नमः पादयोः क्लीं कीलकाय नमः नाभौ मम श्री
धर्मार्थकाममोक्षार्थे जपे विनियोगः सर्वांगेषु इति ऋ-
ष्यादिन्यासः अथ करन्यासः श्रीं ह्रीं क्लीं सौः अंगुष्ठाभ्या
नमः ॐ ह्रीं श्रीं तर्जनीभ्यां नमस्वाहा कएईलह्रीं मध्य-
माभ्यां वषट् हसकहलह्रीं अनामिकाभ्यां हुं सकलह्रीं
कनिकाभ्यां वौषट् सौः ऐं क्लीं ह्रीं श्रीं करतलपृष्ठाभ्यां फट्
इति करन्यासः अथ षडंगन्यासः श्रीं ह्रीं क्लीं ऐं सौः

पं ३

हृदयायनमः श्रींह्रीं शिरसेस्वाहा कएईलह्रीं शिखायवौ
षट् कलह्रींकवचायहुं सकलह्रीं नेत्रत्रयायवौषट् सौंःऐं
क्लींह्रींश्रीं अस्त्रायफट् इतिषडंगन्यासः अथध्यानम्
ॐ चंद्रार्कानलकोटिनीरदरुचिं पाशांकुशासाङ्गुगान्
मुंडंखड्गमभीतिमीप्सरवरं हस्तैर्भुजैरष्टभिः कामेशा
नशिवोपरिस्थितिपरां ध्यायेद्दीं वहंतीं परां श्रीचिंतामणि

मंत्रबीजवपुषीं ध्यायेन्महाषोडशीमिम् इति स्वहृदि देवीं ध्या
त्वा मानसोपचारैः संपूज्य मंत्रं संकुर्याद्यथा कंहसः ॥
श्रीं ह्रीं क्लीं ऐं सौः ॐ ह्रीं श्रीं कएईलह्रीं सकलह्रीं कलह्रीं
सौः ऐं क्लीं ह्रीं श्रीं इत्युत्कीलनमंत्रं त्रिर्जप्त्वा सौः ऐं क्लीं ह्रीं श्रीं
ऐं ५ श्रीं ह्रीं क्लीं सौः ॐ ह्रीं श्रीं कएईलह्रीं हसकलह्रीं सक
लह्रीं इति संजीवमंत्रं त्रिर्जप्त्वा ऐं क्लीं सौः कएईलह्रीं

७ ॐह्रींश्रीं सदाशिवस्यशापंमोचय.२ सकलह्रीं इतिशाप
१ हारिमंत्रदशधाजप्त्वा ॐनमस्त्रिपुरायै दह२ दुरितं।
हन हन कीलान् त्रिपुरीस्वाहा अन्यस्त्रमंत्रंविर्जप्त्वा ॐम्रू
लॐ इतिमृतकद्वयनिवारणार्थं सप्तधामंत्रजप्त्वा इति
मंत्रसंस्कारंकृत्वा मालांवामकरेगृहीत्वा मंत्रयेद्यथा
मालेमालेमहामालेसर्वशक्तिस्वरूपिणी चतुर्वर्गस्त्वयि

न्यस्तस्मान्मे सिद्धिदा भव दत्तकरे मालां संपूज्य येद्य

या ॐ ह्रीं सिद्ध्यै नमः गंधादिनपुष्पैर्मां संपूज्य गमवि

घ्नं कुरु माल्ये मे स्वाहा यथाशक्ति जपं कृत्वा मालां शिर

सि संस्थाप्य पुनरपि प्राणायामं ऋष्यादिकरषडंग

न्यासादिकं विधाय सकलह्रीं श्रीं ह्रीं क्लीं ऐं सौः ॐ ह्रीं।

श्रीं कएईलह्रीं हसकलह्रीं सौः ऐं क्लीं ह्रीं श्रीं इति संपु

नि १

८ मंत्रविर्जप्त्वा गुह्यातिगुह्यगोप्त्रीत्वंगृहाणास्मत्कृतंजपम् सि
8 द्धिर्भवतुमेदेविप्रसीदपरमेश्वरी इतिमंत्रेणततोजपफले
देव्यावामहस्तेसमर्प्य मालांरहः संस्थाप्य इतिसुखंवि
॥ ॥ हरेदितिशिवम् ॥ ॥ ॥ ॥ ॥ ॥ ॥

नदुक्तंतन्त्रसारसंहितायां आधारंत्रिपदंप्राहुः षट्पदंवा
चतुष्पदं अथवावर्तुलाकारंकुर्याद्दैविमनोहरं स्वर्णरौप्य
शिलाकूर्मकपालालाबुमृण्मयं नारिकेलंचपर्णं(वं)चमुक्ताश्
क्तिसमुद्भवम् पुण्यवृक्षसमुद्भूतंपात्रंकुर्याद्विचक्षणः अ
तिह्रस्वमतिस्थूलंभिन्नंछिन्नंचवर्जयेत् स्वर्णरौप्यताम्रा
णिसर्वसिद्धिकराणिच शांतिकेचशिलापात्रंस्तंभनेचैव

९ सृण्मयैम् नारिकेलं वष्पादौ ह्यभिचारे च कूर्मजं शंखजा।
१ नप्रदं मुक्ताशुक्तिजाननप्रदायिनी कपालालाबुपात्राणि यो
गसिद्धिकराणि च पुण्यवृक्षजपात्राणि सर्वपापहराणि च
मुक्त्वैतेषु देवेशि पात्रमेकं प्रकल्पयेत् श्रात्मदेवत्वयोर्म ध्ये
पात्राणि स्थापयेद्बुधः गुरोः पात्रं घटस्यांते नदंते भोग।
पात्रकं नदंते शक्तिपात्रं च योगिनीनां तदंतिके नदंते वीरपा
त्रं च वलेः पात्रं तदंतिके पाद्यमाचमनीयं च पात्राणि स्थापये

द्वयः उत्तमं नवपात्राणां मध्यमम् केचिद्वदंति
मंत्रज्ञाः पंचपात्राणां मध्यमं अधमं पात्राणां पात्रत्रयमथा मंत्रीणि २
पि च देवतापूजने मंत्री एकपात्रं न कारयेत् पंचपात्रपक्षे
देविपात्रं गुरोः पात्रं भोगपात्रं त्रयं मतं पूजापात्रं वलेः पात्रं पंचपा त्रे
त्रयं विधिः पंचपात्रेषु पूजापात्रं तु विज्ञेयं योगिनीनां चतर्प
णे पाद्यमाचमनीचवलेः पात्रं सुरार्चने ॥ ॥

९

कालदंष्ट्रे भयकारिके मां रक्ष दारय २ मर्द २ हन २ हुं फट् स्वाहा ३

पोषितो भूत्वा कृष्णाष्टम्यां कृष्णचतुर्दश्यां रवौ वा अष्टोत्तरशत

10

सहस्रं जपेत् ततः श्मशानभूमिं गत्वा दग्धमृद्माणीय शत्रु

नाम्नाभिधाय पुत्तलकं विधाय गृहधूम सकुराजिका रक्तचंदन

कुंकुमैर्द्रव्यैः शत्रोर्नामाक्षराणि वक्षोण्यां यंत्रमध्ये विलिख्य त

हृदये मर्जपत्रे निवेश्य तद्हृदयं निमीलयेत् द्रव्यशेषेण पुत

लकमर्चयेल्लेपयेच्चानेन द्रव्येणाकृष्णपक्षे पूजनं ७ सप्तव

नील पुष्पैः

र्वैरकंटकान्यादाय शितमुख्याप्य मंत्रपठे वेधयेत् मुखवे
धे भवेन्मूको वधिरः कर्णवेधनः चक्षुर्वेधे भवेदंधः नाभि
हृत्कंठवेधनः मरणं प्राप्नुयाच्छत्रुर्महारोगादिनास्तथा ।
हस्तवेधो न कर्तव्यः सर्वमन्यत्र वेधयेत् हस्तवेधात्स्वयं दुःख
प्राप्नुयादिति निश्चितं ततः शूलैर्वैधितं तत्पुत्तलकं कृष्णव
स्त्रेण वेष्टयित्वा श्मशान दक्षिदिग्भागे निखनेत् शत्रुतत्का
लमेव तथाभूतो भवति ततो निसार्य कंटकान्युद्धृत्य जलेन

११ शत्रुः स्वस्थो भवेत् रविवारे चतुर्दश्यां भौमे श्यां त्रयोद १
शनौ अमावास्यां ॐ नमो भगवते उड्डामरेश्वराय
अमुकस्य नाशं कुरु कुरु ठः ठः स्वाहा सहस्रं जपेत्
दक्षिणाभिमुखः जपेदेकविंशति दिने २१ पश्चाद्दाने
गोवस्त्रं सुवर्णं शिवप्रतिमादीनां कांस्यपात्रं सघृतं दद्यात्
सर्वत्र बलिदानं

ॐ स्वस्ति हेमपात्रगतं दिव्यं परमान्नं सुसंस्कृतं पंचयाप
दूसोपेतं गृहाण परमेश्वरि अमृतमस्तु अमृतायतां
सावित्राणि सावित्रस्य देवस्यत्वा सवितुः प्रसवेश्वि
नोर्बाहुभ्यां पूष्णोहस्ताभ्यां आददे महागणपतये कु
माराय श्रियै सरस्वत्यै लक्ष्म्यै विश्वकर्मणे द्वारदेवता
९८ भ्यः प्रजापतैर्ब्रह्मणोकलशयाग देवताभ्यः ब्रह्मा विष्णु
महेश्वर देवताभ्यः चतुर्वेदपराय सानुचराय ॥

१२ नुपतये नारायणाय दुर्गायै त्र्यंबकाय वरुणाय यज्ञपुरुषा
य अग्निष्वात्तादिभ्यः पितृगणेभ्यो नागदेवताभ्यः स्वमायै वा
र्वत्यै टंकधारिण्यै नारायै पार्वत्यै पवित्रिण्यै श्रीशारिका
भगवत्यै सहस्रनाम्न्यै श्रीदेव्यै भवान्यै भवाय देवाय
शर्वाय देवाय पशुपतये देवाय उग्राय देवाय भीमाय देवा य
महते देवाय पार्वतीसहिताय देवाय महेश्वराय सदाशिवाय
महागणपतये विनायकाय एकदंताय कृष्णपिंगलाय

गजाननाय लंबोदराय भालचंद्राय हेरंबाय आखुर
थाय विघ्नभक्षाय वासुदेवाय संकर्षणाय प्रद्युम्ना
य अनिरुद्धाय सत्याय पुरुषाय अच्युताय लक्ष्मीस
हिताय नारायणाय ह्रांह्रींसः सूर्याय सहस्राय अन
न्ताय एकाक्षाय परमार्थसाराय अनन्तदेवाय (तेजो
मयाय) तेजोरूपाय भास्कराय अनंतादिभ्यः अष्टा

भ्यः कुलनागदेवताभ्यः दुर्गाक्षेत्रगणेश्वरदेवताभ्यः
भूमिदेवताभ्यः भुवर्देवताभ्यः स्वर्देवताभ्यः भूर्भुवः
उपभूर्भुवः महागायत्र्यै सावित्र्यै सरस्वत्यै अनेकदेव्यै
भवान्यै स्थानदेवाय वास्तुपुरुषाय हेरुकादिभ्यः व
टुकादिभ्यः अत्यन्नममृतं दिव्यं शाकक्षीरदधिमंथना
त देवेशभक्तरूपेणनैवेद्यंप्रगृह्यताम् ॥ ॥ ॥

उच्छिष्टचांडालिनि हृदय सुमुखि शिरखा देवि शिर म
ध्यवासिनि कवचं ह्रीं नेत्र ठः ठः ठः अस्त्र इति म्
लमंत्रः भैरवो ऋषिः गायत्री छंदः सुमुखी देवता अभि
ष्टसिद्ध्यर्थे जपे विनियोगः अथ ध्यानम् गुंजाभूषितहृ
त्कुचां सुललितां सद्यौवनोल्लासिनी हस्ताभ्यां नृकपालख
ड्गलतिके रम्ये मुदा बिभ्रतीम् वस्त्रालंकृतलेपनं लसदेह
प्रभां ध्यायतां नृणां श्रीसुमुखी शवासनगतां स्युः स

उन्मा वस्त्र

(१४)